## वा यौ। (५७/३२९२)

पूर्वेण नित्ये प्राप्ते विकल्प [1]उच्यते। यु इति ल्युटो ग्रहणम्। यौ परभूते अजेर्वा वी इत्ययमादेशो भवति। प्रवयणो दण्डः, प्राजनो दण्डः। [2]प्रवयणमानय, प्राजनमानय॥

## ण्यक्षत्रियार्षञितो यूनि लुगणिञोः। (५८/१२७६)

ण्यादयो गोत्रप्रत्ययाः[3]। [4]ण्यान्तात् क्षत्रियगोत्राद् [5]आर्षाद् ञितश्च [6]परयोः अण्इञोर्यूनि लुग् भवति। [7]ण्यान्तात् तावत् — 'कुर्वादिभ्यो ण्यः' (४.१.१५१/११७५), तस्माद् यूनि इञ्, (४.१.९५/१०९५), तस्य लुक्[8]। कौरव्यः पिता। कौरव्यः पुत्रः[9]। ननु च कौरव्यशब्दः [10]तिकादिषु पठ्यते, ततः फिञा भवितव्यम्, कौरव्यायणिः इति? क्षत्रियगोत्रस्य तत्र ग्रहणम्,[11] 'कुरुनादिभ्यो ण्यः' (४.१.१७२/११९०) इत्यनेन विहितस्य, इदं तु ब्राह्मण-गोत्रम्, 'कुर्वादिभ्यो ण्यः' (४.१.१५१/११७५) इति[12]। [13]क्षत्रिय — 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (४.१.११४/१११७) इत्यण्, तस्माद् यूनि [14]इञ्, तस्य लुक्। श्वाफल्कः पिता। [15]श्वाफल्कः पुत्रः। [16]आर्ष — 'ऋष्यण्' (४.१.११४/११९०), तस्माद् यूनि इञ्, तस्य लुक्[17]। वासिष्ठः पिता। वासिष्ठः पुत्रः। [18]ञित्— 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' (४.१.१०४/११०६), तस्माद् यूनि इञ्, तस्य लुक्। बैदः पिता। बैदः पुत्रः। अणः खल्वपि — 'तिकादिभ्यः फिञ्' (४.१.१५४/११७८), तस्माद् यूनि 'प्राग् दीव्यतोऽण्' (४.१.८३/१०७३), तस्य लुक्। तैकायनिः पिता। तैकायनिः पुत्रः। एतेभ्यः इति किम्? 'शिवादिभ्योऽण्' (४.१.११२/१११५), तस्माद् यूनि '[19]अत इञ् (४.१.९५/१०९५), तस्य लुग् न भवति। [20]कौहडः पिता। कौहडि पुत्रः। यूनि इति किम्? वामरथ्यस्य [21]छात्राः वामरथाः। 'कुर्वादिभ्यो ण्यः' (४.१.१५१/११७५) इति ण्यः, तस्मात् 'कण्वादिभ्यो गोत्रे' (४.२.१११/१३३२) इति शैषिकोऽण्। तस्य लुग् न भवति। अणिञोः इति किम्? दाक्षेरपत्यं [22]युवा दाक्षायणः[23]।

[१७४] अब्राह्मणगोत्रमात्रमात्राद्युवप्रत्ययस्योपसङ्ख्यानम्। (म.भा. १.४८९)

बौधिः पिता। बौधिः पुत्रः। [24]जाबालिः पिता। जाबालिः पुत्रः। औदुम्बरिः पिता। औदुम्बरिः पुत्रः (म.भा. १.४८९)। [25]भाण्डीजङ्घिः पिता। भाण्डीजङ्घिः पुत्रः[26]। शाल्वावयवलक्षण इञ् (४.१.१७३/११९१), तस्मात् फक् (४.१.१०१/११०३), तस्य लुक्। पैलादिदर्शनात् सिद्धम्॥

## पैलादिभ्यश्च। (५९/१०८४)

पैल इत्येवमादिभ्यश्च युवप्रत्ययस्य लुग् भवति। 'पीलाया वा' (४.१.११८/११२१) इत्यण्, तस्माद् 'अणो द्व्यचः' (४.१.१५६/११८०) इति फिञ्, तस्य लुक्। पैलः पिता। पैलः पुत्रः। अन्ये पैलादयः इञन्ताः तेभ्यः 'इञः प्राचाम्' (२.४.६०/१०८५) इति लुकि सिद्धेऽप्रागर्थः पाठः।

पैल। [27]शालङ्कि। [28]सात्यकि। सात्यकामि। [29]दैवि। [30]औदमज्जि। [31]औदव्रजि। [32]औदमेघि। [33]औदबुद्धि। [34]दैवस्थानि। [35]पैङ्गलायनि। राणायनि। [36]रौहक्षिति। भौलिङ्गि। औद्गाहमानि। औज्जिहानि। 'तद्राजाच्चाणः[37]' (ग.सू. २१)। आकृतिगणोऽयम्॥

---

1. आरभ्यते इ, अयम् इत्यधिकम् ह. 2. उदाहरणमिदं नास्ति क.ड.इ.ह. 3. गृह्यन्ते इत्यधिकम् ह. 4. ण्यन्तात् क. 5. अर्षञितः इ. 6. परतः ह. 7. ण्यन्तात् क.इ. 8. भवति इत्यधिकम् क.इ. 9. गार्ग्यः पिता, गार्ग्यः पुत्रः इत्यधिकम् क. 10. तिशादिषु ह. 11. औरसशब्दसाहचर्यात् इत्यधिकम् ब. 12. ण्यः इत्यधिकम् अ.क.ब.ड.इ. 13. क्षत्रियः ड. 14. इति इत्यधिकम् इ. 15. उदाहरणमिदं नास्ति ह. 16. आर्षात् इ. 17. भवति इत्यधिकम् ग. 18. आर्षञितः ब.क.इ. 19. अतः नास्ति फ. 20. कौहेडः क, कौहेडिः ब, कौहेडिः पिता, कौहेडिः पुत्रः इ.ह. 21. इमे इत्यधिकम् क. 22. माणवकः इ. 23. यञिञोश्चेति लुक् न भवति, यञिञोश्चेति फक् क. 24. जाङ्गलिः पिता, जाङ्गलिः पुत्रः ह. 25. उदाहरणमिदं नास्ति ब. 26. इत्यादि इत्यधिकम् इ. 27. औदुम्बरिः ह. 28. सत्यंकि इ. 29. नास्ति क.ह. 30. औदंचि क. 31. औदञ्जि ह. 32. नास्ति ह. 33. औदशुद्धि इ.ह, औदपाणि, ऐराणी ह. 34. देवसादि ह. 35. पैगालि क. 36. राहक्षिति क.इ. 37. अङ्गस्यापत्यं आङ्गः पिता, आङ्गः पुत्रः इत्यधिकम् क.इ.